# सन्तानगोपालहोमः

सन्तानगोपहोमेन सुपुत्राः संभवन्ति हि ।
तस्माद्धोमः प्रकर्तव्यः शुभपुत्रप्रदो नृभिः ॥

शुभायां शुक्लपञ्चम्यां द्वादश्यां श्रवणेऽपि वा ।
जन्मर्क्षे तु विशेषेण अयने चोत्तरे तथा ।
सन्तानार्थं चरेद्धोमं सत्पुत्रस्तस्य जायते ॥

सन्तानपूर्वगोपालमन्त्रेणैवाथ केवलम् ।
पुत्रार्थी पुत्रमाप्नोति नात्र कार्या विचारणा ॥

अथ यजमानः सपत्नीकः देवान् गुरूंश्च नमस्कृत्य अनुज्ञां कुर्यात् । अशेषे + स्वीकृत्य ... नक्षत्रे ... राशौ जातस्य ... शर्मणः मम, ... नक्षत्रे ... राशौ जातायाः ... नाम्न्याः मम धर्मपत्न्याश्च आवयोः सन्तानगोपालप्रसादेन जीवत्सुपुत्रावाप्त्यर्थं मया मम धर्मपत्या वा इहजन्मनि जन्मान्तरेषु वा बुद्धिपूर्वकं अबुद्धिपूर्वकं वा विहितानां विष्णुनिन्दन-विष्णुपूजार्थकल्पितद्रव्यापहरण-विष्णुशिवान्यतरोत्कर्षस्थापन-विष्णुपुराणकथातत्प्रवाचकादि-दूषणादिजनितानां सर्वेषां पापानां फलत्वेन इदानीं अनुभूयमान-अनपत्यतारूपदोषनिवृत्तिद्वारा आवयोः आयुष्मत्सुरूप-सुगुण-बहुसुपुत्रावाप्त्यर्थं भगवत्सन्तानगोपालमन्त्रेण समिदन्नाज्यहोमं कर्तुं योग्यतासिधिं अनुगृहाण ॥ इति परिषदं प्रार्थ्य,

विघ्नेशपूजां कृत्वा, पूर्वोक्तविधिना संकल्प्य, विघ्नेशं उद्वास्य, ग्रहप्रीतिं कृत्वा, ऋत्विजो वृत्वा, अग्निं प्रतिष्ठाप्य,

स्वगृह्योक्तविधिना मुखान्तं कृत्वा, अग्नेरुत्तरतः स्थण्डिले द्रोणमात्रव्रीहीन् तदुपरि तदर्धतण्डुलांश्च निक्षिप्य, तदुपरि सन्तानगोपालसालग्रामं संस्थाप्य, तदग्रे दशनिष्कप्रमाणेन तदर्धप्रमाणेन वा सुवर्णेन निर्मितां सन्तानगोपालप्रतिमां पञ्चगव्येन शोधितां विन्यस्य, प्राणप्रतिष्ठां कृत्वा, द्वयोरपि मूर्त्योः पुरुषसूक्तविधानेन षोडशोपचारपूजां कृवा, परमान्नं निवेद्य, कदलीफल-दध्याज्य-शर्करा-समन्वितं पकान्नं (?) ऋत्विग्भिः सह सन्तानगोपालमन्त्रेण अष्टोत्तरसहस्रसंख्यया जुहुयात् ॥

मन्त्रस्तु – अस्य श्रीसन्तानगोपालकृष्णमहामन्त्रस्य, आनन्द-तार-नारदादय ऋषयः, अनुष्टुप्छन्दः, भगवान् श्रीसन्तानगोपालकृष्णो देवता। अं बीजं, नमः शक्तिः कृष्णेति कीलकम्। मम सन्तानगोपालप्रीत्यर्थे जपे विनियोगः। आमित्यादिभिः षड्भिर्दीर्घैः षडङ्गन्यासाः।

ध्यानम् –
पाणौ पायसभक्तमाहितरसं बिभ्रन्मुदा दक्षिणे
सव्ये शारदपूर्णचन्द्रधवलं हैयङ्गवीनं दधत्।
कण्ठे कल्पितपुण्डरीकनखमप्युद्दामकाञ्चीं वहन्
देवो दिव्यदिगम्बरो दिशतु नः पुत्रं यशोदाशिशुः॥

लमित्यादिभिः पञ्चपूजा।

अथ मूलमन्त्रः –

देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ॥

देवदेव जगन्नाथ गोत्रवृद्धिकर प्रभो ।
देहि मे तनयं शीघ्रं आयुष्मन्तं यशस्विनम् ॥

अथ हृदयादिन्यासाः । एवं मूलमन्त्रेण अष्टोत्तरसहस्रं जुहुयात् । ततः स्विष्टकृतं हुत्वा जयादिहोमशेषं समापयेत् । अथ सन्तानगोपालमूर्तिं साष्टाङ्गं प्रणम्य सपत्नीकः साञ्जलिः

"शङ्खं चक्रं गदां शार्ङ्गं धारयन्तं कराम्बुजैः ।
अङ्के शयानं देवक्या वसुदेवसुतं भजे ॥

गोविन्दतनयं शीघ्रं देहि मे त्रिजगद्गुरो ।
पाहि मां शरणं प्राप्तं पुत्रदानेन माधव ॥"

इति संप्रार्थ्य, पुनःपूजां कृत्वा, आवाहितां देवतां उद्वास्य, सन्तानगोपालप्रतिमां ब्राह्मणाय दद्यात् । तत्रायं मन्त्रः –

गोपाल करुणामूर्ते त्वन्मूर्तिं स्वर्णनिर्मिताम् ।
पूजयित्वा ददाम्यद्य सन्तानं यच्छ मे शुभम् ॥

इति । अथ आचार्याय वरं ऋत्विभ्यो दक्षिणां च दत्वा, बन्धुभिः सह ब्राह्मणान् भोजयेत् ।

एवं यः कुरुते विप्रो भक्तियुक्तेन चेतसा ।
अपुत्रो लभते पुत्रं गोपालस्य प्रसादतः ।
ईप्सितानि च सर्वाणि प्राप्नुयान्नात्र संशयः ॥

इति सन्तानगोपालहोमः ॥

## सन्तानपरमेश्वरमन्त्रः

अस्य श्रीसन्तानपरमेश्वरमहामन्त्रस्य, सौभरिर्भगवान् ऋषिः, अनुष्टुप्छन्दः, श्रीसोमास्कन्दपरमेश्वरो देवता, ओं बीजं, नमः शक्तिः, शिवाय कीलकं, श्रीसोमास्कन्दपरमेह्स्वरप्रसादसिद्ध्यर्थे जपे विनियोगः । ह्रामित्यादिभिः षडङ्गन्यासाः ।

ध्यानम् –
पार्वतीसहितं स्कन्दनन्दिविघ्नेशसंयुतम् ।
चिन्तयामि हृदाकाशे भजतां पुत्रदं शिवम् ॥

लमित्यादिभिः पञ्चपूजा ।

मूलमन्त्रः –
भगवन् रुद्र सर्वेश सर्वभूतदयापर ।
अनाथनाथ सर्वज्ञ पुत्रं देहि मम प्रभो ।

रुद्र शंभो विरूपाक्ष नीलकण्ठ महेश्वर ।
पूर्वजन्मकृतं पापं व्यपोह्य तनयं दिश ॥

चन्द्रशेखर सर्वज्ञ कालकूटविषाशन ।
मम सञ्चितपापस्य लयं कृत्वा सुतं दिश ॥

त्रिपुरारे क्रतुध्वंसिन् कामाराते वृषध्वज ।
कृपया मयि देवेश सुपुत्रान् देहि मे बहून् ॥

अन्धकारे वृषारूढ चन्द्रवह्न्यर्कलोचन ।
भक्ते मयि कृपां कृत्वा सन्तानं देहि मे प्रभो ॥

कैलासशिखरावास पार्वतीस्कन्दसंयुत ।
मम पुत्रं च सत्कीर्तिं ऐश्वर्यं चाशु देहि भोः ॥ इति ।

अथ हृदयादिन्यासाः । ध्यानम् । लमित्यादिभिः पञ्चपूजा ।

इमं मन्त्रं महेशस्य जपेद्यो लक्षसंख्यया ।
तावद्भिर्बिल्वपत्रैश्च पद्मैर्वाऽर्चेच्च चंपकैः ।
तस्य देवप्रसादेन सुपुत्रो जायते ध्रुवम् ॥

इति सन्तानपरमेश्वरमन्त्रः ॥

# पुत्रकामेष्टिः

अथातो वन्ध्यात्वचतुष्टयनिवृत्त्यर्थं पुत्रकामेष्टिं व्याख्यास्मामः । अवाप्तसमस्तकामोऽपि साकेताधिपतिर्दशरथः अनपत्यतया दूयमानः स्वतनयां शान्तां भगवते ऋश्यशृङ्गाय दत्वा तं शान्तमनसं कदाचित् विनयावनतः प्रणम्य पप्रच्छ । भगवन् पुत्रार्थं मया बहुभिरश्वमेधैर्भगवान् इष्टः । चीर्णानि बहूनि व्रतानि ।

स्नातं च गङ्गादिषु अनेकेषु पुण्यतीर्थेषु। बहुभार्यस्यापि मम तिस्रो मुख्याः ,तासु एकस्यामपि वंशप्रतिष्ठानकरं पुत्रं नालभे। स च पुत्राभावः केन दोषेण संजातः कथं वा परिहार्य इति न च जाने। सर्वज्ञस्य तव न किञ्चिदस्त्यविदितम्। तस्मात् तस्य निष्कृतिं कृपया ब्रूहीति।

अथ वैभण्डकिरुवाच। दंपती शुद्धमनसौ चन्द्रताराबलयुते शुभेऽहनि शुभे मुहूर्ते नूतनवस्त्राभरणादि-मङ्गलद्रव्यालङ्कृतौ वाद्यघोषवेदघोषपुरस्सरं किमपि पुण्यक्षेत्रं प्रविश्य, देवसन्निधौ यज्ञशालां विधाय, तां वितान-कदलीस्तंभ-रङ्गवल्ल्यादिभिरलङ्कृत्य, तस्यां चतुर्हस्तप्रमाणेन वेदिं कृत्वा, तां खारीपञ्चकपरिमितधान्येन पूरयित्वा, तस्यां ऐशानप्रदेशे नवग्रहमण्डलं धान्यमध्ये षोढशदलपद्मं च विलिख्य, षोडशकलशान् पञ्चत्वक्पल्लवनारिकेलवस्त्राद्यलङ्कृतान् सुवासितपुण्यतीर्थजलपूरितान् निधाय, तेषु निष्कमात्रसुवर्णनिर्मिताः वक्ष्यमाणदेवताप्रतिमाः निधाय, सदस्यान् अनुज्ञाप्य, स्वेष्टदेवताप्रार्थनापुरस्सरं सर्वविधपुत्रप्रतिबन्धकदोषनिवृत्तिद्वारा आवयोः आयुष्मत्सुरूपबहुसुपुत्रावाप्त्यर्थं पुत्रकामेष्टिं करिष्य इति संकल्प्य, आचार्यवरणं ऋत्विग्वरणं च कुर्याताम्।

अथ यजमानः नान्दीश्राद्धं कृत्वा, पुण्याहं वाचयित्वा, आचार्यं ऋत्विजश्च पुत्रकामेष्टिकर्म कुरुध्वं इति प्रार्थयेत्।

अथ आचार्यः स्थापितासु षोडशसु प्रतिमासु मध्ये लक्ष्मीनारायणं, तस्य दक्षिणतः सरस्वतीब्रह्माणं, उत्तरतः उमामहेश्वरं, ईशानदिशि गणपतिं, पुरस्तादादिशेषं, आग्नेय्यां दिशि मार्कण्डेयं, नैर्ऋत्यां सप्तर्षीन्, वायव्यां सुब्रह्मण्यं, प्रागाद्यष्टदिक्षु दिक्पालान्, ऐशान्यां दिशि नवग्रहमण्डले स्थापिते कलशे नवग्रहदेवताश्च ध्यात्वा, ऋत्विग्भिः सह तत्तद्देवतानां प्राणप्रतिष्ठापुरस्सरं आवाहनादिषोडशोपचारपूजां कुर्यात्।

अथ दंपती नीराजनं कृत्वा प्रदक्षिणनमस्कारैः देवता आराध्य वाग्यतौ उपविशेताम्। अथ आचार्यः उत्तरतो वितस्तिद्वयपरिमितं चतुरश्रं पञ्चकोणं वा मेखलात्रयशोभितं कुण्डं कृत्वा तत्र लौकिकाग्निं प्रतिष्ठाप्य, तत्र चरुं श्रपयित्वा, स्वगृह्योक्तविधानेन मुखान्तं कृत्वा, तस्मिन्नग्नौ आराधिता देवता आवाह्य, पालाशसमिद्भिश्चरुणा आज्येन च प्रजापते न त्वदेतानीति पञ्चभिः, प्रेतो मुञ्चामीति पञ्चभिः, नेजमेषेति तिसृभिः, सोमो धेनुं, इहैवस्तम्बाव्योष्टमिति द्वाभ्यां, धाता ददातु न इति चतसृभिः, यस्त्वा हृदेति चतसृभिः, विष्णु-ब्रह्म-रुद्र-गणपति-स्कन्दानां तत्तद्गायत्रीभिः मार्कण्डेयस्य सप्तर्षीणां च ऋषे मन्त्रकृतामिति मन्त्रेण, शेषस्य तमो अस्तु सर्पेभ्य इति तिसृभिः, नवग्रहाणां दिक्पालानां च तत्तन्मन्त्रैः, अष्टोत्तरं वा यथोचितं वा सप्ताहं पञ्चाहं त्र्यहं वा सायं प्रातः प्रत्यहं जुहुयात्।